श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री वासुदेव कथितम्

# ॥ श्री सन्तानगोपाल स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidāmbi***

*with the blessings of*

**श्री रङ्गरामानुजमहादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री सन्तानगोपाल स्तोत्रम् ॥

अस्य श्री सन्तानगोपालमन्त्रस्य नारद ऋषिः। अनुष्टुप् छन्दः। श्रीकृष्णो देवता। ग्लौं बीजं नमः शक्तिः। पुत्रार्थे जपे विनियोगः।

देवकीसुत गोविन्द - अङ्गुष्ठाभ्यां नमः।
वासुदेव जगत्पते - तर्जनीभ्यां नमः।
देहि मे तनयं कृष्ण - मध्यमाभ्यां नमः।
त्वामहं शरणं गतः - अनामिकाभ्यां नमः।
देवकीसुत गोविन्द वासुदेव जगत्पते - कनिष्ठिकाभ्यां नमः।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः - करतलकरपृष्ठाभ्यां नमः।
देवकीसुत गोविन्द - ज्ञानाय हृदयाय नमः।
वासुदेव जगत्पते ऐश्वर्याय - शिरसे स्वाहा।
देहि मे तनयं कृष्ण - शक्त्यै शिख्यायै वौषट्।
त्वामहं शरणं गतः - बलाय कवचाय हुम्।
देवकी सुत गोविन्द वासुदेव जगत्पते - तेजसे नेत्राभ्यां वौषट्।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः - वीर्याय अस्त्राय फट्।
भूर्भुवस्सुवरोमिति दिग्बन्धः।

ध्यानम्

वैकुण्ठादागतं कृष्णं रथस्थं करुणानिधिम्।
किरीटिसारथिं पुत्रं आनयन्तं परात्परम्॥

आदाय तं जलस्थं च गुरवे वैदिकाय च।
अर्पयन्तं महाभागं ध्यायेत् पुत्रार्थमच्युतम्॥

---

Women may recite only the stotram.

## अथ स्तोत्रम्

शङ्खचक्रगदापद्मं दधानं सूतिकागृहे।
अङ्के शयानं देवक्याः कृष्णं वन्दे विमुक्तये॥ १ ॥

शङ्खचक्रगदापद्मं धारयन्तं जनार्दनम्।
अङ्के शयानं देवक्याः सूतिकामन्दिरे शुभे॥ २ ॥

एवंरूपं सदा कृष्णं सुतार्थं भावेत्येसुधीः।
श्रीशं कमलपत्राक्षं देवकीनन्दनं हरिम्।
सुतसंप्राप्तये कृष्णं नमामि मधुसूदनम्॥ ३ ॥

नमाम्यहं वासुदेवं सुतसंप्राप्तये हरिम्।
यशोदाङ्कगतं बालं गोपालं नन्दनन्दनम्॥ ४ ॥

अस्माकं पुत्रलाभाय गोविन्दं मुनिवन्दितम्।
नमाम्यहं वासुदेवं देवकीनन्दनं सदा॥ ५ ॥

गोपालं डिम्भकं वन्दे कमलापतिमच्युतम्।
पुत्रसंप्राप्तये कृष्णं नमामि यदुपुङ्गवम्॥ ६ ॥

पुत्रकामेष्टिफलदं कञ्जाक्षं कमलापतिम्।
देवकीनन्दनं वन्दे सुत संप्राप्तये मम॥ ७ ॥

पद्मापते पद्मनेत्र पद्मनाभ जनार्दन।
देहि मे तनयं श्रीश वासुदेव जगत्पते॥ ८ ॥

यशोदाङ्कगतं बालं गोविन्दं मुनिवन्दितम्।
अस्माकं पुत्र लाभाय नमामि श्रीशमच्युतम्॥ ९ ॥

श्रीपते देव देवेश दीनार्तिहरणाच्युत।
गोविन्द मे सुतं देहि नमामि त्वां जनार्दन॥ १० ॥

भक्तकामद गोविन्द भक्तरक्ष शुभप्रद।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो॥ ११ ॥

रुक्मिणीनाथ सर्वेश देहि मे तनयं सदा।
भक्तमन्दार पद्माक्ष त्वामहं शरणं गतः॥ १२ ॥

देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ १३ ॥

वासुदेव जगद्वन्द्य श्रीपते पुरुषोत्तम।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ १४ ॥

कञ्जाक्ष कमलानाथ परकारुणिकोत्तम।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ १५ ॥

लक्ष्मीपते पद्मनाभ मुकुन्द मुनिवन्दित।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ १६ ॥

कार्यकारणरूपाय वासुदेवाय ते सदा।
नमामि पुत्रलाभार्थं सुखदाय बुधाय ते॥ १७ ॥

राजीव नेत्र श्रीराम रावणारे हरे कवे।
तुभ्यं नमामि देवेश तनयं देहि मे हरे॥ १८ ॥

अस्माकं पुत्र लाभाय भजामि त्वां जगत्पते।
देहि मे तनयं कृष्ण वासुदेव रमापते॥ १९ ॥

श्रीमानिनीमानचोर गोपीवस्त्रापहारक।
देहि मे तनयं कृष्ण वासुदेव जगत्पते॥ २० ॥

अस्माकं पुत्रसंप्राप्तिं कुरुष्व यदुनन्दन।
रमापते वासुदेव मुकुन्द मुनिवन्दित॥ २१ ॥

वासुदेव सुतं देहि तनयं देहि माधव।
पुत्रं मे देहि श्रीकृष्ण वत्सं देहि महाप्रभो॥ २२ ॥

डिम्भकं देहि श्रीकृष्ण आत्मजं देहि राघव।
भक्तमन्दार मे देहि तनयं नन्दनन्दन॥ २३ ॥

नन्दनं देहि मे कृष्ण वासुदेव जगत्पते।
कमलानाथ गोविन्द मुकुन्द मुनिवन्दित॥ २४ ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम।
सुतं देहि श्रियं देहि श्रियं पुत्रं प्रदेहि मे॥ २५ ॥

यशोदास्तन्यपानज्ञं पिबन्तं यदुनन्दनम्।
वन्देऽहं पुत्रलाभार्थं कपिलाक्षं हरिं सदा॥ २६ ॥

नन्दनन्दन देवेश नन्दनं देहि मे प्रभो।
रमापते वासुदेव श्रियं पुत्रं जगत्पते॥ २७ ॥

पुत्रं श्रियं श्रियं पुत्रं पुत्रं मे देहि माधव।
अस्माकं दीनवाक्यस्य अवधारय श्रीपते॥ २८ ॥

गोपालडिम्भ गोविन्द वासुदेव रमापते।
अस्माकं डिम्भकं देहि श्रियं देहि जगत्पते॥ २९ ॥

मद्वाञ्छित फलं देहि देवकीनन्दनाच्युत।
मम पुत्रार्थितं धन्यं कुरुष्व रघुनन्दन॥ ३० ॥

याचेऽहं त्वां श्रियं पुत्रं देहि मे पुत्र सम्पदम्।
भक्तचिन्तामणे राम कल्पवृक्ष महाप्रभो॥ ३१ ॥

आत्मजं नन्दनं पुत्रं कुमारं डिम्भकं सुतम्।
अर्भकं तनयं देहि सदा मे रघुनन्दन॥ ३२ ॥

वन्दे सन्तानगोपालं माधवं भक्तकामदम्।
अस्माकं पुत्र संप्राप्त्यै सदा गोविन्दमच्युतम्॥ ३३ ॥

ॐकारयुक्तं गोपालं श्रीयुक्तं यदुनन्दनम्।
क्लीं युक्तं देवकीपुत्रं नमामि यदुनायकम्॥ ३४ ॥

वासुदेव मुकुन्देश गोविन्द माधवाच्युत।
देहि मे तनयं कृष्ण रमानाथ महाप्रभो॥ ३५ ॥

राजीव नेत्र गोविन्द कपिलाक्ष हरे प्रभो।
समस्त काम्यवरद देहि मे तनयं सदा॥ ३६ ॥

अब्जपद्मनिभ पद्मबृन्दरूप जगत्पते।
देहि मे वरसत्पुत्रं रूपनायक माधव॥ ३७ ॥

नन्दपाल धरापाल गोविन्द यदुनन्दन।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो॥ ३८ ॥

दासमन्दार गोविन्द मुकुन्द माधवाच्युत।
गोपाल पुण्डरीकाक्ष देहि मे तनयं श्रियम्॥ ३९ ॥

यदुनायक पद्मेश नन्दगोपवधूसुत।
देहि मे तनयं कृष्ण श्रीधर प्राणनायक॥ ४० ॥

अस्माकं वाञ्छितं देहि देहि पुत्रं रमापते।
भगवन् कृष्ण सर्वेश वासुदेव जगत्पते॥ ४१ ॥

रमाहृदयसंभार सत्यभामामनः प्रिय।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो॥ ४२ ॥

देवकीसुत श्रीनाथ वासुदेव जगत्पते।
समस्तकामफलद देहि मे तनयं सदा॥ ४३ ॥

भक्तमन्दार गम्भीर शङ्कराच्युत माधव।
देहि मे तनयं गोपबालवत्सल श्रीपते॥ ४४ ॥

कारुण्यरूप पद्माक्ष पद्मनाभ समर्चित।
देहि मे तनयं कृष्ण देवकीनन्दनन्दन॥ ४५ ॥

श्रीपते वासुदेवेश देवकीप्रियनन्दन।
भक्तमन्दार मे देहि तनयं जगतां प्रभो॥ ४६ ॥

जगन्नाथ रमानाथ भूमिनाथ दयानिधे।
वासुदेवेश सर्वेश देहि मे तनयं प्रभो॥ ४७ ॥

श्रीनाथ कमलपत्राक्ष वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ४८ ॥

दासमन्दार गोविन्द भक्तचिन्तामणे प्रभो।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ४९ ॥

श्रीनाथ कमलपत्राक्ष गोविन्द मधुसूदन।
मत्पुत्रफलसिद्ध्यर्थं भजामि त्वां जनार्दन॥ ५० ॥

स्तन्यं पिबन्तं जननीमुखांबुजं
विलोक्य मन्दस्मितमुज्ज्वलाङ्गम्।
स्पृशन्तमन्यस्तनमङ्गुलीभिः
वन्दे यशोदाङ्कगतं मुकुन्दम्॥ ५१ ॥

याचेऽहं पुत्रसन्तानं भवन्तं पद्मलोचन।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ५२ ॥

अस्माकं पुत्रसम्पत्तेः चिन्तयामि जगत्पते।
शीघ्रं मे देहि दातव्यं भवता मुनिवन्दित॥ ५३ ॥

वासुदेव जगन्नाथ श्रीपते पुरुषोत्तम।
कुरु मां पुत्रदत्तं च कृष्ण देवेन्द्र पूजित॥ ५४ ॥

कुरु मां पुत्रदत्तं च यशोदाप्रिय नन्दन।
मह्यं च पुत्रसन्तानं दातव्यं भवता हरे॥ ५५ ॥

वासुदेव जगन्नाथ गोविन्द देवकीसुत।
देहि मे तनयं राम कौसल्याप्रिय नन्दन॥ ५६ ॥

पद्मपत्राक्ष गोविन्द विष्णो वामन माधव।
देहि मे तनयं सीताप्राणनायक राघव॥ ५७ ॥

कञ्जाक्ष कृष्ण देवेन्द्रमण्डित मुनिवन्दित।
लक्ष्मणाग्रज श्रीराम देहि मे तनयं सदा॥ ५८ ॥

देहि मे तनयं राम दशरथप्रिय नन्दन।
सीतानायक कञ्जाक्ष मुचुकुन्दवरप्रद॥ ५९ ॥

विभीषणस्य या लङ्का प्रदत्ता भवता पुरा।
अस्माकं तत्प्रकारेण तनयं देहि माधव॥ ६० ॥

भवदीयपदांभोजे चिन्तयामि निरन्तरम्।
देहि मे तनयं सीताप्राणवल्लभ राघव॥ ६१ ॥

राम मत्काम्यवरद पुत्रोत्पत्तिफलप्रद।
देहि मे तनयं श्रीश कमलासन वन्दित॥ ६२ ॥

राम राघव सीतेश लक्ष्मणानुज देहि मे।
भाग्यवत्पुत्र सन्तानं दशरथात्मज श्रीपते॥ ६३ ॥

देवकी गर्भसञ्जात यशोदाप्रियनन्दन।
देहि मे तनयं राम गोपबालक नायक॥ ६४ ॥

कृष्ण माधव गोविन्द वामनाच्युत शङ्कर।
देहि मे तनयं श्रीश गोपबालक नायक॥ ६५ ॥

गोपबाल महाधन्य गोविन्दाच्युत माधव।
देहि मे तनयं कृष्ण वासुदेव जगत्पते॥ ६६ ॥

दिशतु दिशतु पुत्रं देवकीनन्दनोऽयं
दिशतु दिशतु शीघ्रं भाग्यवत्पुत्र लाभम्।
दिशतु दिशतु श्रीशः राघवो रामचन्द्रः
दिशतु दिशतु पुत्रं वंशविस्तार हेतोः॥ ६७ ॥

दीयतां वासुदेवेन तनयो मत्प्रियस्सुतः।
कुमारो नन्दनः सीतानायकेन सदा मम॥ ६८ ॥

राम राघव गोविन्द देवकीसुत माधव।
देहि मे तनयं श्रीश गोपबालक नायक॥ ६९ ॥

वंशविस्तारकं पुत्रं देहि मे मधुसूदन।
सुतं देहि सुतं देहि त्वामहं शरणं गतः॥ ७० ॥

मयाभीष्ट सुतं देहि कंसारे माधवाच्युत।
सुतं देहि सुतं देहि त्वामहं शरणं गतः॥ ७१ ॥

चन्द्रार्क कल्पपर्यन्तं तनयं देहि माधव।
सुतं देहि सुतं देहि त्वामहं शरणं गतः॥ ७२ ॥

विद्यावन्तं बुद्धिमन्तं श्रीमन्तं तनयं सदा।
देहि मे तनयं कृष्ण देवकीनन्दन प्रभो॥ ७३ ॥

नमामि त्वां पद्मनेत्र सुतलाभाय कामदम्।
मुकुन्दं पुण्डरीकाक्षं गोविन्दं मधुसूदनम्॥ ७४ ॥

भगवन् कृष्ण गोविन्द सर्वकामफलप्रद।
देहि मे तनयं स्वामिन् त्वामहं शरणं गतः॥ ७५ ॥

स्वामिन् त्वं भगवन् राम कृष्ण माधव कामद।
देहि मे तनयं नित्यं त्वामहं शरणं गतः॥ ७६ ॥

तनयं देहि गोविन्द कञ्जाक्ष कमलापते।
सुतं देहि सुतं देहि त्वामहं शरणं गतः॥ ७७ ॥

पद्मापते पद्मनेत्र प्रद्युम्न जनक प्रभो।
सुतं देहि सुतं देहि त्वामहं शरणं गतः॥ ७८ ॥

शङ्ख चक्र गदा खड्ग शार्ङ्गपाणे रमापते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ७९ ॥

नारायण रमानाथ राजीवपत्रलोचन।
सुतं मे देहि देवेश पद्मपद्मानुवन्दित॥ ८० ॥

राम माधव गोविन्द देवकीवरनन्दन।
रुक्मिणीनाथ सर्वेश नारदादि सुरार्चित॥ ८१ ॥

देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं श्रीश गोपबालकनायक॥ ८२ ॥

मुनिवन्दित गोविन्द रुक्मिणीवल्लभ प्रभो।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८३ ॥

गोपिकार्जितपङ्केजमरन्दासक्तमानस।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८४ ॥

रमाहृदयपङ्केजलोल माधव कामद।
ममाभीष्ट सुतं देहि त्वामहं शरणं गतः॥ ८५ ॥

वासुदेव रमानाथ दासानां मङ्गलप्रद।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८६ ॥

कल्याणप्रद गोविन्द मुरारे मुनिवन्दित।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८७ ॥

पुत्रप्रद मुकुन्देश रुक्मिणीवल्लभ प्रभो।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८८ ॥

पुण्डरीकाक्ष गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ८९ ॥

दयानिधे वासुदेव मुकुन्द मुनिवन्दित।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ९० ॥

पुत्रसम्पत्प्रदातारं गोविन्दं देवपूजितम्।
वन्दामहे सदा कृष्णं पुत्रलाभ प्रदायिनम्॥ ९१ ॥

कारुण्यनिधये गोपीवल्लभाय मुरारये।
नमस्ते पुत्रलाभार्थं देहि मे तनयं विभो॥ ९२ ॥

नमस्तस्मै रमेशाय रुमिणीवल्लभाय ते।
देहि मे तनयं श्रीश गोपबालकनायक॥ ९३ ॥

नमस्ते वासुदेवाय नित्यश्रीकामुकाय च।
पुत्रदाय च सर्पेन्द्रशायिने रङ्गशायिने॥ ९४ ॥

रङ्गशायिन् रमानाथ मङ्गलप्रद माधव।
देहि मे तनयं श्रीश गोपबालकनायक॥ ९५ ॥

दासस्य मे सुतं देहि दीनमन्दार राघव।
सुतं देहि सुतं देहि पुत्रं देहि रमापते॥ ९६ ॥

यशोदातनयाभीष्ट पुत्रदानरतः सदा।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ९७ ॥

मदिष्टदेव गोविन्द वासुदेव जनार्दन।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ ९८ ॥

नीतिमान् धनवान् पुत्रः विद्यावांश्च प्रजापते।
भगवंस्त्वत्कृपायाश्च वासुदेवेन्द्रपूजित॥ ९९ ॥

यः पठेत् पुत्रशतकं सोऽपि सत्पुत्रवान् भवेत्।
श्रीवासुदेव कथितं स्तोत्ररत्नं सुखाय च॥ १०० ॥

जपकाले पठेन्नित्यं पुत्रलाभधनं श्रियम्।
ऐश्वर्यं राजसम्मानं सद्यो याति न संशयः॥ १०१ ॥

॥ इति श्री सन्तानगोपाल स्तोत्रं संपूर्णम् ॥